M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref. / Ser. 152

Title: Agnyadhan Prayoga

Sati

Agnyādhān Prayoga	Title
	Author
	Editor
	Year, Vols.
	Publisher
182.	Remarks

182

182

आ०नो श्रीगणेशाय नमः ॥ श्री ॥ अथाग्न्याधानप्रयोगः ॥ ॥ तस्य कालः शिशिरवसंतग्रीष्म ऋतवः। पौर्णमा
स्यमावास्यायजनीयास्तिथयः। कृत्तिकारोहिणीपुनर्वसुपूर्वोत्तराफल्गुनीचित्रानक्षत्राणि। मृगशीर्ष
विशाखाप्रोष्ठपदश्रवणानूराधाअपीतिकेचित्। अत्ररोहिणीमुख्यावैशाख्यामावास्याप्रोक्ता मुख्यतम
कालः। ऋतुनक्षत्रपर्वयोगः प्रधानं। रोहिणीयुक्तयजनीयोपवसथयोर्वा। तदभावे ऋतुनक्षत्रयोगएव।
तत्रापिपूर्वपक्षएव। ऋतुपर्वणोर्योगोवा। आर्ताधानेतुनर्तुननक्षत्रपर्वनियमः। सोमपूर्वाधानेतुआधा
नदिनएवयथादीक्षाभवतितथातत्पूर्वकालएव। एवमन्यतरत्राग्नीनाधास्यमानोब्राह्मणानुज्ञातः सपत्नीकः
कूश्मांडगणहोमगोदानादिभिरात्मानंपावयित्वा। पूर्वेद्युर्नांदीश्राद्धानंतरंशान्त्युदकं शांतिं प्रति सरबंधं
च विधाय। श्वोभूतेस्नानपवनमंत्राचमनमंत्रप्रोक्षणानिकुर्यात्। ऋत्विजः स्नानादिचतुष्टयंकुर्युः। ततः पु
ण्याहंवाचयेत्। तत्राग्निः प्रीयतामितिविशेषः। ततऔपासनाग्नेः पश्चाद्दर्भानास्तीर्य प्राक्कूलेषु पत्नीयजमा
नावुपविशतः। उत्तरतः पतिर्दक्षिणतः पत्नी। ऋत्विजस्तयोरुत्तरतः। प्राङ्मुखाउपविशंति। ततः पत्नीयजमा
नौजपतः। पाः पुरस्तादित्यादिनिविष्टमित्यंतंजपित्वा। श्रीपरमेश्वरप्री तिकामः सर्वकामोग्नीनाधास्ये।

इतिमनसात्रिः संकल्प्यत्रिरुच्चैर्वदेत्। सोमपूर्वेतुसोमेनयक्ष्यमाणः सर्वकामइतिविशेषः। वरणार्हानृत्वि
जः प्राह। तन्मत्रध्वतामित्यादि ओंतथेत्यंते ॥ अथर्त्विग्वरणं। असावद्दमाध्वर्यवेणत्वागच्छामियाजयतु
माभवान्। ब्रह्मत्वेनहोत्रेणौद्गात्रेणाग्नीध्रकर्मादिनेत्यादिनापादावुपसंगृह्य। तत्राश्वलायनोयजमानः स्व
शाखानुसारेणब्रह्मादीनृत्विजोवृणीते। चंद्रमामेब्रह्मासमेब्रह्माब्रह्मार्थंत्वादेवदत्तशर्माणंवृणे। ब्रह्माहनो
जपति। महन्मेवोचोभर्गोमेवोचोभर्गोमेवोचोयशोमेवोचः स्तोमंमेवोचः क्लृप्तिंमेवोचोभुक्तिंमेवोचस्तृप्तिंमेवो
चः सर्वंमेवोचइति। याजयितत्वेतु। तन्मामवतुतन्मामाविशतुतन्माजिन्वतुतेनभक्षिषीयेतिचजपित्वा। चंद्रमा
तेब्रह्मासनेब्रह्माब्रह्माहंतेमानुषः। इतिप्रतिजानीते। यजमानोहोतारंवृणीते। अग्निर्मेहोतासमेहोता
होतारंत्वामुंवृणइति। होतामहन्मइत्यादिजपित्वा। अग्निष्टेहोतासतेहोताहोताहंतेमानुषः। यजमानः।
आदित्योमेध्वर्युः समेध्वर्युरध्वर्युंत्वामुंवृणे। अध्वर्युर्महन्मइत्यादि। आदित्यस्तेध्वर्युः सतेध्वर्युरध्वर्यु
रहंतेमानुषः। यजमानः। अस्मिन्कर्मण्याग्नीध्रंत्वामहंवृणे। आग्नीध्रः भविष्यामीत्युक्त्वा बोधायनयज
मानस्यसर्वानेवशाखानुसारेणवृणीते। तेचप्रत्यूचुः। आदित्योदेवोदैव्योध्वर्युः सतेध्वर्युस्तेनाहंमतः क
पर्जन्योमेउद्गातासमेउद्गाताउद्गातारंत्वामुंवृणइत्युद्गातारं उद्गातामहन्मेइत्यादि पर्जन्यस्तेउद्गाता
सतेउद्गातोद्गाताहंतेमानुषः २

वी॰आ॰शे॰ मैवाहंकरिष्यामि। महन्मेवोचोयशोमेवोचोभर्गोमेवोचोभर्गोमेवोचस्तपोमेवोचः स्तोमंमेवोचः
२ कृतिंमेवोचोभुक्तिंमेवोचोविश्वंमेवोचः सर्वंमेवोचः कल्याणंमेवोचस्तन्मामवतुतन्माविशतु।तन्माजि
न्वतुतेनभुक्षिषीयदेवोदेयमेतिसोमः सोममेत्यौतथेति।यजमानोदृष्टनाम्नोस्त्रिओंमधुपर्केणार्हवि
ष्ये।वरणक्रमेणब्रह्मादीन्कांडानुसमयेनपदार्थानुसमयेनवार्हयेत्।एकविंशतिदर्भमयंविष्टरंनिर्मि
त्यतिन।विष्टरोविष्टरोविष्टरइति।त्रल्विग्दगग्रेतस्मिन्नुपविशति।अहंवर्ष्मसजातानांविद्युतामिवसूर्यः।
इदंतमधितिष्ठामियोमाकश्चाभिदासति।यजमानेनपात्रेउदकेत्रिर्निवेदितेदक्षिणंपादंप्रक्षालनार्थं
प्रयच्छति।ततः सगंधपुष्पाक्षतान्वितजलंहृपेअर्घ्यंत्रिर्निवेदितेतमंजलिनाप्रतिगृह्णाति।आचम
नीयेजलेत्रिर्निवेदितेसावशेषंतदाचामति।अमृतोपस्तरणमसीति।शुध्यर्थंपुनरन्येनजलेनाचामति।
मधुमिश्रेसर्पिर्मिश्रेवादधिनि।सापिधानेमधुपर्केत्रिर्निवेदितेआह्रियमाणंतमीक्षते।मित्रस्यत्वाचक्षुषा
प्रतीक्षे।अंजलिनाप्रतिगृह्णाति।देवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यांप्रतिगृह्णामि।अ
वेक्षते।मधुवाताऋतायते॰भवंतुनः।सव्येपाणौकृत्वानामिकयाचांगुष्ठेनत्रिः प्रदक्षिणमालोड्यतदे २

कदेशं।वसवस्त्वागायत्रेणछंदसाभक्षयंत्वितिपुरस्तान्निमार्ष्टि।रुद्रास्त्वात्रैष्टुभेनछंदसाभक्षयंत्वि
तिदक्षिणतः।आदित्यास्त्वाजागतेनछंदसाभक्षयंत्वितिपश्चात्।विश्वेत्वादेवाआनुष्टुभेनछंदसाभक्षयं
त्वित्युत्तरतः।मध्याद्गृहीत्वोत्क्षिपति।भूतेभ्यस्त्वेतित्रिः।ततोमधुपर्कपात्रंभूमौनिधायैकदेशंगृहीत्वाभ
क्षयति।विराजोदोहोसि।शुध्यर्थमाचम्यपुनर्गृहीत्वा।विराजोदोहमशीय।शुध्यर्थमाचम्यपुनर्गृहीत्वा।
मयिदोहःपद्यायैविराजः।त्वलविप्राशनंसशेषमशेषंवा।अवशिष्टमुदगुपविष्टायब्राह्मणायप्रयच्छेदप्सु
वाक्षिपेत्।शुध्यर्थमाचम्यपूर्वंनिवेदिताचमनीयेनसशेषमाचामति।अमृतापिधानमसि।शुध्यर्थमा
चम्यावशेषेणाचामति।सत्यंयशःश्रीर्मयिश्रीःश्रयतां।इत्याचम्य।गवित्रिर्निवेदितायां।मातारुद्रा
णांदुहितावसूनांस्वसादित्यानाममृतस्यनाभिः।प्रनुवोचंचिकितुषेजनायमागामनागामदितिंवधिष्ट।
निजपित्वोमुत्सृजतेतिवदेत्।यजमानोगंधपुष्पयज्ञोपवीतवस्त्रालंकारादिभिः पूजयित्वामधुप
र्कांगभोजनमाजिजेद्द्यात्।एवंब्रह्मादीनर्हयित्वा।अध्वर्युंतद्वारवयार्हयेत्॥ ॥तत्रायंबोधायनम
धुपर्कः॥ ॥यजमानःशुद्धागारमध्येएरकासनेउदग्दशमहतंवाससुगुणंवासजास्तीर्यतत्रप्राङ्मुखंह

आ॰प्र तमृत्विजश्च वरेश्य तस्यैवागारस्येशानभागे प्रागग्रेषु दर्भेषु स्थूलापिधानसहितं कांस्यपात्रं चतुरः
२ कूर्चान् दधि मधु घृतमापः पयश्च पृथक्पात्रेषु वस्त्रयुगं कुंडलयुगं भोजनपात्रं स्रगलंकरणीयमुदकं
मंत्रप्रोक्षणीपात्रमुदपात्रं व्रीहीन्यवान्वा इत्यासादयेत्। मत्स्यागोर्मधुपर्कार्थं पयआनीतं तां दक्षिणार्थं चान्यां
सन्निधापयेत्। पवित्रे कृत्वा प्रोक्षणीपात्रमुत्तानीकृत्य प्रोक्ष्य तस्मिन् त्रिः पवित्रमप आनीय निरुत्पूय पान्या
निपात्राण्युत्तानीकृत्य त्रिः प्रोक्ष्य कांस्यपात्रं कूर्चेनाच्छादयित्वा तस्मिन् त्रिः पवित्रं मध्वानीय दध्यानयति॥ अ
नंतरं घृतमानीय पयआनयति। ततो प आनीय वषट्कृते जीमये नापिधाय कूर्चेनाल्पिने प्रयति कूर्च इति।
ऋत्विक् कूर्चं इत्युक्त्वा प्रतिगृह्य प्रदक्षिणं परिभ्राम्य तमासनस्याधस्तात् अन्यं च पुरस्तादुपगूहति। राष्ट्र
भृदस्याचार्यासंदीमात्वद्योषमिति। यजमान उदपात्रे प आनीय कूर्चाभ्यामधस्तादुपरिष्टाच्च परिगृह्य
ता पाद्या आप इति प्राह। ऋत्विक् ता अभिमंत्रयते। आपः पादावनेजनीर्द्विषंतं नाशयंतु मे। अस्मिन्कुले ब्रह्म
वर्चस्यसानीति। ततो दक्षिणं पादं पूर्वं प्रसारयति ततो वामं स्त्री प्रक्षालयति पुमानभिषिंचति विपरी
तं वा। ऋत्विक्पादावनेक्तः पाणी संमृशति। मयि महो मयि भगो मयि यशः इति। अप उपस्थ २

स्याप्मन उरोऽभिमृशति। मयींद्रियं वीर्यमिति। अपस्पृशति। यजमानः पात्रांतरे प आनीय व्रीहिभिर्यवै
र्वा संमिश्र्य कूर्चाभ्यां परिगृह्य अर्हणीया आप इति प्राह। ऋत्विक् ता अभिमृश्य ब्रूयात्। अन्नागन्यशसा वर्चसा
सं सृज पयसा तेजसा च। तं मा प्रियं प्रजानां कुर्वधिपतिं पशूनामिति। यजमानस्तामेकदेशं ऋत्विग्भ्य
आचामयति। ऋत्विगानीयमानमेकदेशमनुमंत्रयते। विराजो दोहोऽसि विराजो दोहमशीय मम पद्याय वि
राजः। यजमानस्ताः परावीनश्यमाना आपोऽनुमंत्रयते। समुद्रं वः प्रहिणो॰ मत्पय इति। पुनरपि पा
त्रांतरे प आनीय कूर्चाभ्यां परिगृह्योपस्तरणीय इति प्राह। ऋत्विक् ता आदायामृतोपस्तरणमसी
त्यनेन मंत्रमुक्त्वा त्रिः पिबेत्। द्विः परिमृजेत्। आचमनशेषं समापयेत्। यजमानः कूर्चाभ्यां मधुपर्कपा
त्रं परिगृह्य मधुपर्क इति प्राह। ऋत्विक्तमनुमंत्रयते। त्र्यैविद्याये यशोऽसि यशसो यशोऽसि ब्रह्मणो
दीप्तिरसि तं मा प्रियं प्रजानां कुर्वधिपतिं पशूनामिति। तमुभाभ्यां हस्ताभ्यां परिगृह्णाति। देवस्य
त्वा॰ भ्यां प्रतिगृह्णामि। पिधानं दूरीकृत्य तत्र वामकं पंचणानि कुशापनितमंगुष्ठेनोपकानि ष्टिका

भा० प्र० णाचोपसंगृह्य नैर्ऋत्यां दिशि निरस्यति। नेद्धा विद्धं कृंता भिवातैघोरान् नूस्तर्वान् मा विशायो
४ स्मान्देष्टि यं वयं द्विष्म इति। अप उपस्पृश्य सर्वाभिरंगुलीभिर्मिश्रीकृत्य प्राश्नाति। यन्मधुनोम
धव्यं परमम्नाद्यं वीर्यं तेनाहं मधुनो मधव्येन परमेणान्नाद्येन वीर्येण परमो ऽन्नादो मधव्यो ऽसानीति।
सकृदेवमंत्रमुक्त्वा त्रिः प्राश्नाति। प्राशितमवशिष्टं च त्रिः पिबति। शेषमात्मनः प्रियाय दद्यात्। यजमा
नः पात्रांतरे प आनीय कूर्चाभ्यां परिस्तीर्य पिधानीयाप इति प्राह। ऋत्विक्ताः पिबेत्। अमृतापिधा
प्रा० ६ नमसीति। उदङ्मुखं पूर्ववद्दत्त्वाचम्य प्राङ्मुख उपविशेत्। यजमानः कृतांजलिर्गौरिति त्रिर्दर्शयति। ऋत्वि
क्। गौरस्यपहतपाप्मापपाप्मानं नुद मम चामुष्य चेति। यजमानस्य च घ्नंतं नामग्रहणांतितानुक्त्वा
स्वनंतमनुमंत्रयते। गोर्धेनुर्भव्या मातारुद्राणां प्र नु वोचं ॰ धिष्ट। विवलद्दकं तृणान्यत्त्वोमुत्सृजतेति।
यजमानः पिष्टान्नं सिद्धं भूतमिति प्राह। ऋत्विक्सद्भूतमित्युक्त्वा तदनुमंत्रयते। भूतं सा विराड्भूत
न्मा। क्षांपिदितन्मे ते शीयतन्मर्जस्यौ धाऊं कल्पयते ते ति। ततश्चतुरो नानागोत्रान् ब्राह्मणान् भोजयेतेति ४

प्र्यात्। ते पुष्टुत्कवत्कभोजनपात्रेअन्नमस्मा उपहरंति। तदृत्विक्प्राश्नाति। विराडसि विराडन्नं
विरा द्विराजो मयि धेहि द्विति। यजमान आचांताय त्विजे वस्त्रयुगं कुंडलयुगं दोग्ध्रीं गां स्वगलंकरणा
नि च यथासंभवं दद्यात्। बौधायनप्रमुखादीनाम प्ययमेव मधुपर्कः॥ ॥ अथाग्न्यायतनं॥ ॥
शुद्धे देशे दीर्घं चतुरस्रं समचतुरस्रं वा प्राग्दक्षिणद्वारद्वययुक्तमागारं परिकल्प्य तन्मध्ये गार्हपत्यस्यायत
नं। गार्हपत्यमध्यादारभ्य द्वादशप्रक्रमे द्वादशपदे वा प्रक्रमाष्टके पदाष्टके वा आहवनीयमध्यं अपरं
पंचदशांगुलं द्विपदस्त्रिपदो वा प्रक्रमः। एकपदो पीति केचित्। द्वादशांगुलः प्रादेशः। चतुर्विंशत्यंगुला
रत्निः। एवामन्यतमायामं रज्जुं पंचधा भिद्य द्वाभ्यां संभुज्य षष्ठं सप्तमं वा भागमागंतुकं संयोज्योभ
यतः पाशौ कृत्वा पुनः पंचधा संभुज्याप रस्माद्रंतादागहयेतीति लक्षणं कृत्वा गार्हपत्याहवनीयमध्य
शंक्वोः पाशौ प्रतिमुच्य लक्षणं गृहीत्वा दक्षिणाभ्यायम्य लक्षणे शंकुं निहन्यात्। एवमुत्तरत आयम्य
र्थे दक्षिणशंको रुद्रद्वादशनिलाधिकांगुलद्वये शंकुं निहन्यात्स दक्षिणाग्नेर्मध्यः। पंचदशांगु

आ॰ प्र॰ लांरज्जुं उभयतःपाशांकृत्वाएकंपाशंदक्षिणाग्निमध्यशंकौप्रतिमुच्यतत्पारज्ज्वामंडलंपरिलिखेत्।
५८ मंडलस्योत्तरेरेखायांमध्यशंकोरंऽसान्यंशंकुंनिहत्यतस्मिन्पाशंप्रतिमुच्यमंडलांतरंह्रस्वंपरिलि
खेत्।मंडलयोःसंसर्गप्रदेशेनियम्योनरंपाश्वंपुनरुज्जेत्।अवशिष्टंदक्षिणाग्नेरायतनंभवति।एवंभा
व्यत्तांरज्जुंविपर्यस्यदक्षिणंगृहीत्वोत्तरतआसव्यलक्षणेशंकुंनिहन्यात्सउत्करः।एवंदक्षिणतस्त
दूसायतनं।गार्हपत्यमध्यशंकाउभयतःपाशांसार्धत्रयोदशांगुलायामांरज्जुंप्रतिमुच्यतयामंडलंप
रिलिखेत्।तद्गार्हपत्यस्यायतनं।आहवनीयमध्यशंकोःपश्चात्पुरस्ताच्चानुदृष्टंप्रादेशमात्रेशंकूनि
हन्यात्।अरत्निद्वयायामांरज्जुमुभयतःपाशांकृत्वान्यतरस्मात्पाशादारभ्यद्वादशांगुलेद्वादशांगु
लेचलक्षणंकृत्वाहवनीयपूर्वापरशंकोःपाशौनिधायद्वितीयेलक्षणेगृहीत्वादक्षिणाकृष्यप्र
थमेलक्षणेशंकुंनिहन्यात्।एवमुत्तरतः।रज्जुंव्यत्यस्यैवंदक्षिणतउत्तरतश्च।तच्चतुरस्त्रमाहु
वनीयस्यायतनं।आहवनीयस्यापरस्माच्छंकोःषण्णवत्यंगुलेशंकुः।तस्मिन्नेवमाहवनीयवच्चतु ५

लक्षणेनदक्षिणाकृष्यलक्षणेशंकुंनिहन्यात् उभौपाशौतस्मस्यलक्षणशंकौप्रतिमुच्य २

रस्त्रंनिधायषण्णवत्यंगुलनिहितशंकोर्दक्षिणात उत्तरतश्चद्वात्रिंशदंगुलेशंकूतेश्रोणी।आहवनीयस्याप
रस्माच्छंकोर्दक्षिणतउत्तरतश्चतुर्विंशत्यंगुलेशंकूतावंसौ।दक्षिणश्रोण्यंसांतरालेरज्जुंद्विगुणांकृत्वोभयतःपा
शांमध्येलक्षणंकृत्वादक्षिणश्रोण्यंसशंकोःपाशौप्रतिमुच्य [illegible] लक्षणेनदक्षिणा [illegible] कृष्यलक्षणे
शंकुंनिहन्यात्।उभौपाशौतस्मस्यलक्षणशंकौप्रतिमुच्यमध्यलक्षणेनदक्षिणश्रोणिशंकोरारभ्यद
क्षिणांसशंकुपर्यंतंपरिलिखेत्।एवमुत्तरपार्श्वंपरिलिखेत्।एवंपूर्वमपरंचपार्श्वंस्वप्रमाणद्विगुणर
ज्ज्वापरिलिखेत्।तत्संनमनं।यदित्वल्पीयसीभूमिस्तदाषण्णवत्यंगुलनिहितशंकोर्दक्षिणोत्तरयो
रंऽसाद्धनहवेनमत्स्योडलाद्यतदाऊर्ध्वेनोपमृष्यतोद्वात्रिंशदंगुलेशंकूनिहन्यात्तेश्रोणी।एवमाहु
वनीयस्यापरस्माच्छंकोर्दक्षिणोत्तरयोश्चतुर्विंशत्यंगुलेशंकूतावंसौ।यद्वाषण्णवत्यंगुलांरज्जुं
द्वादशधासंभुज्यागंतुकंत्रयोदशचतुर्दशपंचदशेषुचिह्नयित्वापारशेपाशंविधायत्रयोदशां
शेयथापुरस्ताद्भवतितथाषण्णवत्यंगुलनिहिताहवनीयापरशंकोःपाशौप्रतिमुच्यत्रयोदशे

आ॰ शे नदक्षिणोत्तरयोराकृष्यचतुर्दशेशंकून्निहन्यात्तेश्रोणी। पाशौव्यत्यस्यत्रयोदशेनदक्षिणोत्तरयो
९ राकृष्यपंचदशेशंकून्निहन्यात्तावंसौ। एवं वेदिंविधायसर्वतः संनमयेत्। यद्वादक्षिणश्रोण्यं स
शंकोरंसादक्षिणतः स्वांतराकद्वादशांशेनशंकून्निहत्यतयोरागंतुकत्रयोदशांशाधिका
मुभयतःपाशांरज्जुंप्रतिमुच्यतयादक्षिणंपार्श्वंपरिलिखेत्। एवंसर्वतः। प्राकृतांद्व्यंशाधिकां
प्राकृतयोरेवप्रतिमुच्यपरिलिखेदित्यधिकंविद्॥ ॥एवंदर्शपौर्णमासिकीवेदिः॥ ॥प्रागेव
यज्ञपात्राणिसंपादनीयानितेषांलक्षणान्युच्यंते। हस्त्योष्ठंसमुखवायसपुच्छानामन्यतमाकारासे
चनवत्यः। प्रादेशमात्रारत्निमात्रावाबाहुमात्रावान्यतमायामास्त्वक्फलानासेचनवत्योदक्षमूलदंडाअ
ग्रासेचनाआयामार्धदंडाअवशिष्टाध्यामार्धेयथाशोभंत्रिचतुःपंचाष्टांगुलबिलमुक्ताअवशिष्टा
ग्राः। अग्निहोत्रहवणीस्रुक्जुहूपभृद्ध्रुवावसाहोमहवनीपृषदाज्यग्रहण्याद्याः। बाहुमात्रीस्रुक्प्रादेशम
ध्येबिलाग्रेसंपाद्यावशिष्टोदंडःकार्यः। स्रुवस्तुरत्निमात्रोंगुष्ठपर्वमात्रवृत्तबिलः। कृष्टिमेक्षणे ६

रत्निमात्रेचतुरंगुलविस्तृतसमाग्रे। उलूखलंप्रादेशारत्निबाहुमात्रान्यतमायामंतदर्धविस्तारंत
दायामत्रिगुणोमुसलः। प्राशित्रहरणंप्रादेशमात्रंगोकर्णाकृतिचतुरंगुलदंडं। स्फ्यःखड्गाकारः
चतुरंगुलविस्तारोरत्निमात्रः। चमसाः प्रादेशमात्राश्चतुरंगुलदंडाअष्टांगुलचतुरस्रबिलाः। शम्या
षट्त्रिंशदंगुलाष्टांगुलकुंबावा। इडापात्रंदारुपात्र्यावरत्निमात्रेचतुरंगुलदंडावशिष्टबिले। गोदोह
नंचतुरंगुलदंडंप्रादेशमात्रमष्टांगुलवर्तुलबिलं। पिधानमपितादृशंदंडरहितं। स्रुवाग्निहोत्रहव
ण्योर्वैकंकत्यौ। जुहूर्वसाहोमहवनीप्रचरण्यः पालाश्यः। उपभृत्पृषदाज्यग्रहण्यावैकंकत्यौ। स्फ्यश
म्याःस्रुवप्राशित्रोलूखलमुसलानिखादिराणि। इतराण्यहोमार्थानिवारणानि। सौमिकान्यप्यसामे
व्यग्रोधाश्वत्थौदुंबरावा। सौमिकग्रहदधिघर्मधानीप्रवर्ग्यपात्राण्यौदुंबराणि। अन्यानिकर्मविशेष
नियतानितत्तत्कर्मणेवक्ष्यंते॥ ॥अरण्याराधानकालेयथाशुद्धिर्भवतस्तथापूर्वमेवसंपादनीये।
तत्रायंविधिः। आधानात्पूर्वंशरदिहेमंतेवापूर्वस्मिन्दिनेकृतमंगलस्नानः पुण्याहंवाचयित्वाग्रामा
द्बहिः प्राचींमुदीचींवादिशमुपनिष्क्रम्ययत्रकुत्रचिद्वाश्वत्थप्ररोहोनातिउच्चैरोग्धस्थदक्षः शमीगर्भो
रघो

आ॰ प्र॰ ऽरामीगर्भोवाविद्यनेतत्रगत्वाचतुरंगुलोत्सेधेद्वादशांगुलविस्तारेषोडशांगुलायामेअपिवास
२ र्गतःप्रादेशमात्र्योश्चतुरंगुलोत्सेधेअधरोत्तरारणीआहरेत्।अरण्योरुत्तराधरभावोविदारितस्
क्षस्कंधोत्तराधरभागनिबंधनः।अविदारितेयथेष्टं।उत्तरारण्याःप्रत्यग्भागात्प्रजननशंकुंकु
र्यात्।उत्तरारण्यवसानेऽधरारण्याएवकुर्यात्॥ ॥अथाध्वर्युर्यस्योजघनेनगार्हपत्यमुपविश्य
जपंति।इडादेवहूरितिजपित्वा।अथाध्वर्युःस्फ्यमादाययजमानपत्नीभ्यांसहवेदकुत्करावंतरेण
प्रविश्यतिष्ठन्यजमानेनान्वारब्धोगार्हपत्यस्यायतनमुद्धंति॥ ॥उद्धन्यमानमस्याअमेध्यमपपा
प्मानंयजमानस्यहंतु।शिवानःसंतुप्रदिशश्चतस्रःशंनोमातापृथिवीतोकसाता।अपउपस्पृश्य
उपविश्याथेनदक्षिरबोक्षतिः।शंनोदेवी॰शंतुनः।एवमन्वाहार्यपचनमाहवनीयंच।उद्धननप्रभृतिवि
राजकर्मोपस्थानांतंसर्वंसहयजमानं।अंतर्वेद्यानुपूर्व्येणस्थापितान्पार्थिवान्यानसंभारांश्चसंभा
रानेकैकेनयजुषासंभरति।वैश्वानरस्यरूपंपृथिव्यांपरिस्रुता।स्योनमाविशंतुनः।इतिसिकताः
।यदिदंदिवोयददः।पृथिव्याःसंजज्ञानेरोदसीसंबभूवतुः।ऊषान्कृष्णमवतुकृष्णमूषाइहोभयोर्यज्ञि ६
दि

आरण्याखूत्करं
यंवार्धेनुरिरिक्तमाद्धेनुरीशकलःस्मृतः।शकलद्वितयंगुंजाद्वेगुंजेमानमुच्यते

यमागमिष्ठाः।इत्यूषान्।ऊतीःकुर्वाणोयत्पृथिवीमचरोगुहाकारमाखुरूपंप्रतीत्य।ततोन्यत्कामि
हसंभरंतःशतंजीवेमशरदःसवीराः।इत्याखूत्करं।ऊर्जःपृथिव्यारसमाभरंतःशतंजीवेमशरदः भरं
पुरूचीः।वम्रीभिरनुवित्तंगुहासुश्रोत्रंतउर्व्यबधिराभवामः।इतिवल्मीकवपां।प्रजापतिसृष्टानां
प्रजानांक्षुधोपहत्यैसुवितंनोअस्तु।उपप्रभिन्नमिषमूर्जंप्रजाभ्यःसूदंगृहेभ्योरसमाभरामि।
रतिसूदं।यस्यरूपंबिभ्रदिमामविंदद्गुहाप्रविष्टांसरिरस्यमध्ये।तस्येदंविहतमाभरंतोऽछंबट्
कारमस्यांविधेम।इतिवराहविहतं।यत्पर्यपश्यत्सरिरस्यमध्येउर्वीमपश्यज्जगतःप्रतिष्ठां।म
पुष्करस्यायतनाद्विजातंपर्णंपृथिव्याःप्रथनंहरामि।इतिपुष्करपर्णं।याभिरदृंहज्जगतःप्रति
ष्ठामुर्वीमिमांविश्वजनस्यभर्त्रीं।तानःशिवाःशर्कराःसंतुसर्वाः।इतिशर्कराः।इतित्रीणिराजता
नित्रीणिसौवर्णानिबहुशकलानि।अश्वोरूपंकृत्वायदश्वत्थोतिष्ठः संवत्सरंदेवेभ्योनिलाय।
तत्तेन्यत्कामिहसंभरंतःशतंजीवेमशरदःसवीराः।इत्यश्वत्थं।ऊर्जःपृथिव्याअध्युत्थितो
सिवनस्पतेशतवल्शोविरोह।त्वयावयमिषमूर्जंमदंतोरायस्पोषेणसमिषामदेम।इत्यौदुंबरं।
अग्नेरेनश्चंद्रंहिरण्यमद्भ्यःसंभूतममृतंप्रजासु।तत्संभरन्नुत्तरतोनिधायातिप्रयच्छन्दुरितिंतरेयं।८

वान हंबा· अशनिहतंनाहरेत घोरकृपत्वादाहरे
दामुंजकुलायमयं· केशवस्वामी

आ·श्रे गायत्रिया क्रियमाणस्य यन्ते पर्णमपतत्तृतीयस्यै दिवो धि। सोयं पर्णः सोमपर्णाद्धि जातस्ततो हरामि
सोमपीथस्यावरुध्यै। देवानां ब्रह्मवादं वदतां यदुपाशृणोः सुश्रवा वै श्रुतोसि। ततो मामाविशतु ब्रह्मवर्च
सं तत्संभरंस्तदवरुंधीय साक्षात्। इति द्वाभ्यां पर्णमयं। यया ते सृष्टस्याग्नेर्हेतिमशमयत्प्रजापतिः।
तामिमामप्रदाहाय शमीं शांत्यै हराम्यहं। इति शमी। यत्ते सृष्टस्य यतो विकंकतं भा आर्छज्जातवेदः।
तया भासा संमितउरुं नो लोकमनुप्रभाहि। इति विकंकतं। यत्ते तांतस्य हृदयमाछिंदज्जातवेदो मरुतो
द्भिस्तमयित्वा। एतत्ते तदशनेः संभरामि सात्मा अग्ने सहृदयो भवेह। इत्यशनिहतं। चित्रियादश्व
त्थात्संभृता बृहत्यः शरीरमभिसंस्कृतास्थ। प्रजापतिना यज्ञमुखेन संमितास्तिस्र स्त्रिवृद्भिर्मि
थुनाः प्रजात्यै। इति चित्रियाश्वत्थतिस्रः समिधः। याते अग्ने ओजस्विनी तनूरोषधीषु प्रविष्टा नां त
इह संभरामि। इति मुंजकुलायं।। अथ स्वादव्यवाहादि जातामग्नेस्तनूं यज्ञियां संभरामि। शांतयोनिः
शमीगर्भमग्नये प्रजननयितवे। यो अश्वत्थः शमीगर्भ आरुरोह त्वे सचा। तं ते हरामि ब्रह्मणा यज्ञियैः के
तुभिः सह। इति द्वाभ्यामरणी।। यज्ञियैः केतुभिः सहेति सर्वाण्यपि पात्राणि। यजमान आश्वलायन श्रौत

४ ग्रामादेश्च संभृतस्याश्वत्थस्य तिस्रः समिधः आर्द्राः सपलाशाः सग्रेहाः प्रादेशमात्राः ४
मुंजस्तबकं मुंजपुष्पं वा शीर्णपर्णं वा हरति केशवस्वामी

यो अश्व० तंत्वाहरा० सहेति द्वितीयोपि मंत्रः। यद्यनेन पूर्वं नाहृते संभृतान्संभारान्पुनरपि प्रत्येकं
संभरति। यं त्वा समभरंजातवेदो यथा शरीरं भूतेषु न्यक्तं। स संभृतः सीद शिवः प्रजाभ्य उरुं नो लोक
मनुनेषि विद्वान्। ततो मुंजकुलायचित्रियाश्वत्थसमिद्धिरण्यरजतशकलारणिव्यतिरिक्तांस्त्रेधा वि
भज्यानिदध्यात्।। ।।अग्नीपितृयज्ञः।। ।।अध्वर्युः प्राङ्मुखस्यासीनस्य यजमानस्य दक्षिणगोदानप्रदे
शे ऊर्ध्वाग्राणि त्रीणि दर्भपिंजूलानि निधाय केशवपनादि नखनिकृंतनांतं करोति। वपेत्प्रवपेदेवेनेस
वित्रा प्रसूतो ब्रह्मणा संशितोहं। यजमानः तं देशमभिमंत्रयते। यानि महतः ऊर्ध्वलोमानि तानि मे
स्वस्त्ययेसंतु। पत्न्या अपि मंत्रवर्जं केशव्यतिरिक्तोपपक्षादि वापनं। यजमानमुदकुंभेनाभिषिंचन्यजमा
नं वाचयति। इमामापः शिवाः संतु दुष्कृतं प्रवहंतु मे। शुद्धाः प्रयुंजीमहि क्रतून्। तूष्णीं पत्नीं स्नापयति
स्नातौ पत्नी यजमानौ प्राग्देशं गत्वाऽहतं वासः परिधाय अलंकृत्यांजाते। अथाध्वर्युर्यजमानमेक
विंशत्या दर्भपिंजूलैस्त्रेधा विभक्तैः शिरोनाभिं गुल्फं च पावयित्वा उदपात्रमादाय पत्नीयजमानाभ्यां
सह नैर्ऋतीं दिशं गत्वा चतुष्पथे उदपात्रे आत्मानमवेक्षमाणं यजमानं पत्न्यामपि। आत्मानमवेक्ष

वापमिति केचित्

भा·प्र
९

माणायां ब्रह्मणि दक्षिणत आसीनो यजमानं वाचयति। सिंहे मे मन्युर्व्याघ्रे मेऽन्तरामयो वृके मे क्षु
द्रश्मे मे बासि र्धु श्वनि मे पिपासा राजस्थ हे मे शनया श्मनि मे तन्द्रिर्गर्दभे मे रिशः शल्यके मे क्षीरस्बल
म्बे मे पशुः कूर्मे मेंगरोगो वस्ते मे सर्पयोधिये मे मृत्युभ्यां हव्ये मे पाप्मा सपत्ने मे निर्ऋतिर्दुष्कीते मे व्यार्द्धिः
परस्व नि मे समृद्धिः स्वड्गे मज्जा निर्गवये मज्जां ध्यं गौरे मे बाधिर्यमृक्षे मे शोको गोधायां मे स्वेदा
जरायां मे हिमः छल्लशकुनौ मे भीरुता कशे मे पाप गंधज्जल्हके मे भ्रुश्यशः क्रोके मे ईर्ष्या मर्कटे मे
दुर्बुद्धिः कुकले मे मरः श्वोलूले मे प्रश्नोत्थ्रे मे हृ क्षश्यै मे भ्रमो श्व्यां मश्राव्यं कोशे मे गंधः कुमार्यां मे सका
रः सूकरे मे कृशत्वुः हदस्वनि मे स्वमो जगरे मेडः स्वमो विक्रतिमे स्नमशो लोभार्यायां मे स्कंदः शलभे
मे पापालक्ष्मिलिजीपुमे नृतमङ्गास्कमेकर्कशो ब्रात्ये मर्ईत्याशूद्रे मे स्तेयं वैश्ये मे कार्मकृत्यं राजन्ये कु
निमेल्लाननैषादे मे ब्रह्महत्या कुलिङ्गे मे स्वधुरुलले मे विलास उद्धिणि मे वमनिः किंपुरुषे मे रोदा
द्वीपिनि मे निष्टपक्षः किनि मे किलासः शुनि मेदुरिमस्ना वन्येषु मे क्लैब्यो विदेहे पुंमे शीपथो महावी १

पुमे ग्लौर्मूज वत्स मेत प्राड्डुंडु भौमे काशिके स्वाकुपुमे पित्तं कलिंगे वुमे मेध्य मश्वतर्यां मे प्रजस्ता
पुंःश्चल्यां मेदुश्चरित्रमाखुनि मे दंतरोगो मक्षिकायां मे श्वल्कशः शुके मे हरिमा मयूरे मे जल्प्या द
वे मे जशावाघे मे पापवादोङ्क मे श्रमो ब्रह्मोहत्यै मे कि। विवा अपहिपाप्मन्पुनरपनाशिनो भवानः पा
प्मन्सुकृतस्य लोके पाप्मन्धेह्यवितिहितो यो नः पाप्मं न जहाति तमु त्वा जहि मो वयमन्यत्रास्मिन्निविश
सरि तां सहस्राक्षो अमर्त्यो यो नो द्वेष्टि स रिष्यतु यमु द्विष्मस्तमु जहि। अथैता आपो जलिनोपसंहति।
सुमित्रा न आप ओषधयः संतु। नैर्ऋतीं दिशं प्रक्षिपति। दुर्मित्रास्तस्मै भूयासुर्यो स्मान्द्वेष्टि यं च
वयं द्विष्मः। पात्रं परास्यापउपस्पृश्यानवेक्षमाणाः पुनरागत सर्वे प्रदक्षिणमावृत्यागत्य हस्तपादा
न्प्रक्षाल्याचमनं कुर्युः। अथाध्वर्युः पवमानः सुवर्जन इत्येतमनुवाकं यजमानं वाचयन्नात्मानं प
त्नीं यजमानं चाद्भिः प्रत्यचं प्रोक्षति॥ ॥अथ यजमानः प्राचीनावीती गोपितृयज्ञं करिष्य इति
संकल्प्य लौकिकाग्निमन्वाहार्यपचनेस्थानेस्तं स्मर प्रणीय ज्वलयित्वा परिस्तीर्य पवित्रे कृत्वा

भा॰शे॰ ज्यस्थालीं स्रुवं च सादयित्वा प्रोक्ष्याज्यं संस्कृत्यान्वाहार्यपचनस्योत्तरतः सादयति। चतुरउदकुं
१० भानौदुंबरीं दर्वीं च सादयित्वा। दक्षिणतोग्नेः सकृदाच्छिन्नं बर्हिरेरकोपबर्हणे अंजनाभ्यंजने पात्रा
न्तर आज्यं स्फ्यं दर्भाव्यतिरिक्तं सूत्रं प्रक्षालितउलूखलमुसले कृष्णाजिनं दर्वीं चरुस्थालीमेक्षणा
माज्यस्थालीं प्रोक्षणीमिति। एरकादीनां दक्षिणतोधिदेवनस्थानं कृत्वोल्मुकस्थापनायैकोनपंचाश
त्संख्याकानक्षान्बैभीतकान्निधाय। तद्दक्षिणतः पिंडनिर्वापस्थाने स्फ्येन दक्षिणापवर्गां रेखां
करोति। अपहता असुरा रक्षांसि पिशाचा ये क्षयंति पृथिवीमनु। अन्यत्रेतो गच्छंतु यत्रैषां गतं
मनः। अथैनामङ्गिरवीक्षति। उदीरतामवर उत्परास उन्मध्यमाः पितरः सोम्यासः। असुं य ईयु
रवृका ऋतज्ञास्ते नोवंतु पितरो हवेषु। अथोल्मुकमादत्ते। यआर्द्दहानाः स्वधयानवानिपिभ्या
णिनूपाव्यसुराश्चरंति। परापुरो निपुरो ये भरंत्यग्निष्टांल्लोकात्प्रणुदात्यस्मात्। तेनोद्धतं देशम
भितपति। अग्निः पावकः स्कंदिनानिलश्च वह्निर्लोके स्वरालुदताद्दूरमेकः सः। पितॄणां येदवर्णं तत्वेद
भागमिच्छंती। उल्मुकमभिसमीपे दद्याद्दिग्भ्यान्त। तस्मिन्नाज्यबिंदुं प्रक्षोतयति। ततउद्धते १०

देशे दक्षिणाग्रं बर्हिस्तृणाति। सकृदाच्छिन्नं बर्हिरूर्णाम्रदु स्योनं पितृभ्यस्त्वा स्तृणाम्यहं। अस्मि
मे न्सीदंतु पितरः सोम्याः पितामहाः प्रपितामहाश्चानुगैः सह। अथ बर्हिषस्तु उत्थाय प्रांजलिः
प्रह्वो दक्षिणामुखः पितॄनावाहयति। उदीरणा हुह संतु नः सोम्याः पितरः पितामहाः प्रपिता
महाश्चानुगैः सह। असुं गमाः सत्यवृत्तोऽरकाः स जानो हवं पितरो ह्यागमंतु। एह गच्छंतु पित
रो हविषे अत्तवे। अस्मिन्यज्ञे बर्हिष्यानिषद्यमावीरः प्रमायुनक्। बर्हिर्निधाय पितॄणां पुर
स्तात् दक्षिणतो वा एरकोपबर्हणे दक्षिणोत्तरे निदधाति। आसनं शयनं चेमे तयोः सोम्या सभा
गताः। प्रियाः संतायनो भूत्वा शिवा भवथ शंकराः। आवाह्यमार्जनं चार्घमर्घपानादनंतरं। अ
न्यस्यार्घं पुरा पिंडाद्दत्वार्घं तु विदुर्बुधाः। लोहितेन सहैकेन तंडुलस्याङ्गिरेव वा। स्नानं चतुर्थ
मित्याहुरेतन्मार्जनलक्षणमिति गोभालः। एकैकं उदकुंभार्धेन बर्हिषि पितॄंस्त्रीन्मार्जयति। अथै गो॰
भ्यपानान्याहारयति। मधुपानं क्षीरपानं सक्तुपानं वा नमेषामन्यतमं वा। सक्तुपानपक्षे स्व

आ॰बौ
११

सावाभिभितंभवति। एकैकं चपात्रद्वये संभरणीयं। तत्र षट्स्कद्वयोर्वा त्रितयमेकं वा। ब्रा
ह्मणेभ्योवशिष्टं त्रितयमेकं वा प्रत्येकं त्रिभागंकृत्वा। एतद्वः पितरः पात्रं। एतद्वः पितामहाः पा
त्रं। एतद्वः प्रपितामहाः पात्रं। इति नव कृत्वस्त्रिर्वा दद्यात्। पूर्वमार्जितशेषपिंडोदकुंभार्धेन तूष्णीं
मार्जयति। अथ स्थारित्तानस्थान्परितश्चत्वारः पितापुत्राः पूर्वादिप्रादक्षिण्येन यथाज्येष्ठ
मुपविशंति। अनुज्ञाबहवृष्वेनुत्तरदेशे। तत्र द्वादशाक्षान्पिता कर्षति। एवं ज्येष्ठानुजौ तौ त्रयोवि
ज्ञापिनः समसंख्याकर्षणात्। अवशिष्टाः स्त्रयोदश कनीयाना कर्षतिस पराजितो विष
मसंख्याकर्षणात्। अथ यदि द्वौ पुत्रौ स्यातां तदा पिता चतुर्विंशत्यक्षान्द्विराकृत्याकर्षेत्। अये
कः पुत्रस्तदा जायात्तृतीया। अत्रापि द्वितीयायामः पितापुत्रौ द्वादशाक्षान्कर्षति। त्रयोदशाक्षा
न्भार्येतिसापराजिता। पुत्राभावे जायापती एव प्रत्येकं द्विवारमाकर्षति। अत्रापि भार्यैव। परा
जिता भवति। कृतं कृतमितिमंत्रमुच्चारयंतोक्षान्कर्षंति। कृतं कृतमिति पराजितो जपेद्वा। ११

पतावस्तानेसर्वेषां जपइत्यन्ये। एवं वारत्रयं कृत्वा। धूर्तमोदनमित्युक्तो निष्ठंति। यद्वा पराजि
तावशिष्टेषु पुनः पुनः धूर्तप्रसंगे नावशिष्टानामपि पराजयः पितैव विजयी। जितमोदनं निर्व
पति। पितृभ्यस्त्वा पितामहेभ्यस्त्वा प्रपितामहेभ्यस्त्वा जुष्टमुपाकरोमि। इति सकृदेव प्रोक्ष
ति। पितृभ्य॰भ्यस्त्वा जुष्टं प्रोक्षामि। निर्वापप्रोक्षणेतूष्णीं वा। कृष्णाजिने उलूखलमुसलेनि
धायावहत्यस्कफलीकृतान्प्रक्षाल्य तंडुलोदकं पात्रांतरे निधाय चरुमधिश्रित्याज्यं संस्कृत्यो
भयं पर्यग्निकृत्वा चरौ रूपरिष्टात्प्रभृतमाज्यमानीयस्कन्नवद्वंतं स्वसमन्ज्यन्चरुमभिघार्योद्वा
स्य उपाद्योमार्थं चरौ रेकं पिंडमुद्धृत्य पंच वस्त्र भाकृतीर्जुहोति। याः प्राचीः संभवंत्यापउत्तरतश्च
याः। अद्भिर्विश्वस्य भुवनस्य धर्त्रीभिरंतरन्यं पितुर्दधे स्वधा नमः स्वाहा। पिभरदं। अंतर्दधेप
र्वतैरंतर्मह्या पृथिव्या। दिशाभिरनंताभिर्नूतिभिरंतरन्यं पितामहाद्दधे स्वधा नमः स्वा
हा। पितामहायेदं। अंतर्दधऋतुभिः सर्वैरहोरात्रैः ससंधिकैः। अर्धमासैश्च मासैश्चांतरन्यं

आ॰ श्रा॰ मपितामहाद्येभ्यः स्वधा नमः स्वाहा। प्रपितामहायेदं॰ यन्मे माता प्रलुलोभ चरत्यनुव्रता। तन्मे रेतः
१२ पिता वृंक्तामाभुरन्योपपद्यतां स्वधा नमः स्वाहा। पित्र इदं॰। यदृः कव्यादंगमद्दहलोकान्नयन्नप्रणीव
ज्जातवेदाः। तद्वोऽहं पुनरावेशयाम्यरिष्टाः सर्वैरंगैः संभवतु पितरः स्वधा नमः स्वाहा। पितृभ्य इदं॰।
ततो वपाहोमार्थं पिंडत्रेधाविभज्योपस्तरणाभिघारणवर्जं मोईबर्यादर्व्या जुहोति। सोमाय पितृमते
स्व गुरुभिर्णैर्जकुमोहविः। वाजिभिरंगुपस्त्वनः सुजाहव्यं देवेभ्यः पितृभ्यः स्वधा नमः स्वाहा। सोमाय पितृम
त इदं॰। अंगिरस्वंनमूलर्वेमूमेपितृमंतमाकुवे। वैवस्वतेदमाद्विनः स्वजाहव्यं देवेभ्यः पितृभ्यः स्वधा
नमः स्वाहा। यमायांगिरस्वते पितृमत इदं॰। यदग्ने कव्यवाहन पितृन्यक्ष्यृतावृधः। प्रदेवेभ्यो वहाद
व्यं पितृभ्यश्च स्वजाहव्यं देवेभ्यः पितृभ्यः स्वधा नमः स्वाहा। अग्नये कव्यवाहनायेदं॰। इतिपिंडत्रयेकं
त्वात्तृप्तं दिव्यं॰ मग्नौ निधाय। ततः पिंडान्कृत्वा द्वितीयस्योदकुंभस्यार्धेन तेषु त्रिषु स्थानेषु तूष्णी
माज्ञयित्वा पिंडानुपस्तीर्णोभिघारितान्ददाति। एतत्तेतातामुकशर्मन्ये च त्वामनुयाꣳश्च त्वमत्रा
नुस्पैषाते ततस्वधाक्षितिर्यावतीद्यौर्धिवी तावती तेमात्रा तावतीतएतांमात्रांभूतांददामिद्दधिक्षा १२

भितमसितताययमास्वेछाः। इतिप्रथमं पिंडं दद्यात्। एतत्तेपितामहामुकशर्मन्ये च त्वा॰ यातेपि
तामहस्वधाक्षितिर्यावदंतरिक्षंतावती॰ ददाम्यंतरिक्षेणाभितमसि पितामहायमास्वेछाः। इतिद्वि
तीयंपिंडंददाति। एतत्तेप्रपितामहामुकशर्मन्ये च त्वा॰ यातेप्रपितामहस्वधाक्षितिर्यावतीद्यौस्तावती
ते॰ ददामिद्दिवाभितमसिप्रपितामहायमास्वेछाः। इतितृतीयंपिंडंददाति। द्वितीयस्योदकुंभस्य शे
षेणपूर्ववन्मार्जनंकुर्यात्। अत्रपितरोयथाभागंमंदध्वमित्युक्त्वा। तृतीयकुंभजलंदुंदुलप्रक्षालन
जलेनालोड्य भूमौ पिंडसमीपे प्रवाहयेत्। यानि रसाꣳस्यसृग्भागानियेचापि पितृशोहरंतंबिह
ते रंतांतर्व्यंतुरुधिरंस्यते। येनः पतितागर्भीअसृग्भाजउपासते। तेभ्यः स्वजाः स्वधानमस्तस्य पुर्वंतु
मदंतुच। यआमाये च पक्काये वुदुष्ठोः पतंतिनः। तेभ्यः स्व॰ तुच। येकुमारायास्त्रियोयेविलाताः पत
तिनः। तेभ्यः स्व॰ तुच। ततः पिंडसमीपमागत्यांजनंददाति। आंजतांपितरः। आंजतां पितामहाः।
आंजतांप्रपितामहाः। अभ्यंजनंददाति। अभ्यंजतांपितरः। अभ्यंजतांपितामहाः। अभ्यंजतांप्र
पितामहाः। अथवासाꣳसिददाति। एतानिवः पितरोवासाꣳसि। एतानिवः पितामहावासाꣳसि।

आ॰बौ एतानिवः प्रपितामहानामांसि । इतित्रीणिसूत्राणिछित्वाददाति । अथयजुर्नमस्कारैर्विपर्यासमुपति
१२ ष्ठते । नमोवः पितरोरसाय पितरोनमोवोयएतस्मिंल्लोकेस्थयुष्मांस्तेनुयेस्मिंल्लोकेमांतेनुयएतस्मिं
ल्लोकेस्थयूयंतेषांवसिष्ठाभूयास्तयेस्मिंल्लोकेहंतेषांवसिष्ठोभूयासं । नमोवः पितरःशुष्माय पि० । न
मोवः पितरोजीवाय० । नमोवः पितरःस्वधायै पि० । नमोवः पितरोमन्यवे पि० । नमोवः पितरोघोराय पि० ।
वसिष्ठोभूयास्तं । अतुयज्योपतिष्ठते । अथपुत्रंयाचते । वीरंमेपितरोदत्तपितृमानहंयुष्माभिर्भूयासं
सुप्रजसोमयायूयंभूयास्त । वीरंमेपितामहादत्त पि० । वीरंमेप्रपितामहादत्त पि० स्त । अथैनान्पितॄ
नुत्थापयति । उत्तिष्ठतपितरः प्रेतशूरायमस्यपंथामनुयातपुराणं । धत्तादस्मासुद्रविणंयच्चभ
द्रंप्रणोब्रूताद्भागधांदेवतासु । अथैनान्पितॄन्स्वस्थानंनयन्मनसानुगच्छति । यंतुपितरोयथालोकं
मनसाजवेन । परेतनपितरःसोम्यासोगंभीरैः पथिभिः पूर्व्यैः । अथापितॄन्त्सुविदत्राँ अपीतयमेनये
सधमादंमदंति । अथपितॄननुगतंमनस्त्रिस्त्रभिराह्वयति । मनोन्वाहुवामहेनाराशंसेनस्तोमे
नपितॄणांचमन्मभिः । आनएतुमनःपुनःक्रत्वेदक्षायजीवसे । ज्योक्चसूर्यंदृशे । पुनर्नःपितरोमनो १२

ददातुदैव्योजनः । जीवंव्रातंसचेमहि । अथयजमानःस्वपरिहितमहतंवासोगोपितृयज्ञविदे ब्रा
ह्मणायदत्वान्यत्परित्यागार्हंवासःपरिधायाचम्यदक्षिणांदिशंगत्वाचतुर्थेनोदकुंभेनस्नायात् । या
सुगंधारसावर्णोबलंचनिहितंउभे । तामआपःशिवाःसंतुच्छंतंप्रवहंतुमे । याऊर्जमभिषिंचं । क्षिदे
वप्रेषितामही । तामआ० । यासांनिक्रमणेसर्वमिदंजायतेजगत् । तामआपः० । यासांमित्रेयलो
कास्तेजसापरासाहृताः । तामआ० । याःप्राचीरेवतीर्मधुमतीरापःस्रवंतिशुक्राः । ताम० । यादक्षिणा
रेवती० । ताम० । याःप्रतीचीरेवती० । ताम० । याउदीचीरेवती० । ताम० । याऊर्ध्वारेवती० । ताम० । तुमे । एवमा
र्जनंकृत्वाचम्यतद्पिवासःपरित्यज्यक्षौमंवासःपरिधायाचम्यप्राजापत्यमंत्रंपठन्तोपवीत्यग्नेःसमीप
मुपगच्छति । प्रजापतेनत्वदेतान्यन्योविश्वाजातानिपरिताबभूव । यत्कामास्तेजुहुमस्तन्नोअस्तुव
यंस्यामपतयोरयीणां । पूर्वेपृथक्कृतमुल्मुकमग्नौप्रक्षिपति । अभूद्दूतोहविषोजातवेदाअवाड्ढव्या
निसुरभीणिकृत्वी । प्रादात्पितृभ्यःस्वधयातेअक्षन्प्रजानन्नग्नेपुनरप्येहिदेवान् । ब्राह्मणेभ्यःपिंड
दानोदनेवददाति ॥ ॥ अथयजमानोध्वर्युर्वातस्मिन्नेवाग्नौजयानभ्यातानान्राष्ट्रभृतोमात्यहोमांश्च

आ॰प्र॰ होति॥ ॥चित्तं च स्वाहा।चित्तायेदं॰।चित्तिश्च स्वाहा।चित्त्या इ॰।आकूतं च स्वा॰।आकूताये॰आकूतिश्च
१४ स्वाहा।आकूत्या॰।विज्ञातं च स्वाहा।विज्ञाताये॰।विज्ञानं च स्वाहा।विज्ञानाये॰।मनश्च स्वाहा।मनस इ॰।
शाक्वरीश्च स्वाहा।शक्वरीभ्य इ॰।दर्शश्च स्वाहा॰।दर्शायेदं॰।पूर्णमासश्च स्वाहा।पूर्णमासायेदं॰।बृहच्च स्वा॰।
बृहत इ॰।रथंतरं च स्वाहा।रथंतरायेदं।प्रजापतिर्जयानिंद्राय वृष्णे प्रायच्छदुग्रः पृतनाज्येषु।तस्मै वि
शः समनमंत सर्वाः स उग्रः स हि हव्यो बभूव स्वाहा।प्रजापतय इदं॰॥ ॥इति जयादयः॥ ॥अग्निर्भूता
नामधिपतिः स मावत्वस्मिन्ब्रह्मन्नस्मिन्क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मन्नस्यां देवहूत्यां
स्वाहा।अग्नये भूतानामधिपतय इ॰।इंद्रो ज्येष्ठानामधिपतिः स॰।इंद्राय ज्येष्ठानामधिपतय इ॰।यमः पृ
थिव्या अधिपतिः स॰।यमाय पृथिव्या अधिपतय॰।वायुरंतरिक्षस्याधिपतिः स॰।वायवेंतरिक्षस्या
धिपतय इ॰।सूर्यो दिवोधिपतिः स॰।सूर्याय दिवोधिपतय॰।चंद्रमा नक्षत्राणामधिपतिः स॰।चंद्रमसे न
क्षत्राणामधिपतय॰।बृहस्पतिर्ब्रह्मणोधिपतिः स॰।बृहस्पतये ब्रह्मणोधिपतय॰।मित्रः सत्यानाम
धिपतिः स॰।मित्राय सत्यानामधिपतय॰।वरुणोपामधिपतिः स॰।वरुणायापामधिपतय इदं॰।समु १४

द्रः स्रोत्यानामधिपतिः स॰।समुद्राय स्रोत्यानामधिपतय इदं॰।अन्नं साम्राज्यानामधिपति तन्मावतु
स॰।अन्नाय साम्राज्यानामधिपतय॰।सोम ओषधीनामधिपतिः स॰।सोमायौषधीनामधिपतय॰।सविता
प्रसवानामधिपतिः स॰।सवित्रे प्रसवानामधिपतय॰।रुद्रः पशूनामधिपतिः स॰।रुद्राय पशूनामधि
पतय॰।अप उपस्पृश्य।त्वष्टा रूपाणामधिपतिः स॰।त्वष्ट्रे रूपाणामधिपतय इदं॰।विष्णुः पर्वतानामधिप
तिः स॰।विष्णवे पर्वतानामधिपतय॰।मरुतो गणानामधिपतयस्ते मावंतु॰।मरुद्भ्यो गणानामधिपतिभ्यः॰। श्रौ॰ भ॰
१७ यजमानकर्तृके ध्वर्युः प्रतिहोमं समदृशान्ते वा यजमानं वाचयेत्।पितरः पितामहाः परेवरेत
तास्ततामहा इह मावतेति।अध्वर्युकर्तृत्वेन यजमानवाचनं॥ ॥इत्यभ्यातानाः॥ ॥ऋताषाडृतधामा
स ग्निर्गंधर्वः इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा।ऋतसह ऋतधाम्नेग्नये गंधर्वायेदं॰।तस्यौषधयोप्सरस ऊर्जो
नाम ताभ्य इदं ब्रह्म क्षत्रं पांतु ताभ्यः स्वाहा।ओषधीभ्योप्सरोभ्य ऊर्ग्भ्य इदं॰।संहितो विश्वसामा सूर्यो
गंधर्वः स इदं॰।संहिताय विश्वसाम्ने सूर्याय गंधर्वायेदं॰।तस्य मरीचयोप्सरस आयुवो नाम ता इदं॰।
मरीचिभ्योप्सरोभ्य आयुभ्य इदं॰।सुषुम्नः सूर्यरश्मिश्चंद्रमा गंधर्वः स इदं॰।सुषुम्नाय सूर्यर

नाम

